# शुद्धिकौमुदी

## पाठः ४ – १३.०५.२०१७

## रूपलिङ्गवचनादिदोषाः - २

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ५१. सुमती | ५१. सुमतिः |

शोभना मतिः यस्य सा **सुमतिः** । एषः न मतुबन्तः । अतः, न ङीप् । 'भानुमती' इत्यत्रापि 'मती' इति आनुपूर्वी तु दृश्यते । अत्रापि सा एव आनुपूर्वी । किन्तु, तत्र मतुबन्तता, अत्र मतिशब्दः चेति भेदः स्फुटः अस्ति । अतः, '**सुमतिः**' इति इकारान्तं रूपम्।

| | |
|---|---|
| ५२. मण्डळी | ५२. मण्डली |

'**मण्डली**' इत्यत्र लकारः एव, न ळकारः । प्रादेशिकभाषायां ळकारश्रवणं स्यात् बहुधा । किन्तु, संस्कृते तु लकारः एव । 'ळ'कारः वेदे एव श्रूयते, न तु लोके ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ५३. मणटपः | ५३. मण्डपः |

'**मण्डपः**' इत्येव शुद्धम् । कोषकाराः तस्य विविधान् व्युत्पत्तिप्रदर्शनप्रकारान् दर्शितवन्तः । किन्तु, टवर्गप्रथमयुक्तस्य 'मणटप'शब्दस्य व्युत्पत्तिः केनापि कोषकारेण न दर्शिता । शिष्टप्रयोगाः सर्वे टवर्गतृतीययुक्ताः (मण्डपः इति) एव ।

| | |
|---|---|
| ५४. सङ्गठनम् | ५४. सङ्घटनम्/संघटनम् |

'**सङ्घटनम्**' इति शुद्धम् । सङ्घटनम् इत्यत्र सम् इति उपसर्गः । चेष्टार्थकः घटधातुः । घटधातुः कवर्गचतुर्थादिः, न कवर्गतृतीयादिः । तथैव तत्रत्यः टकारः टवर्गपञ्चमः । न तु टवर्गद्वितीयः । हिन्दीभाषायां 'सङ्गठनम्' इत्येतस्य रूपस्य प्रयोगः क्रियते । तत् तु अशुद्धम् । धात्वादिज्ञानतः एव शुद्धरूपस्य ज्ञानं भवितुम् अर्हति ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ५५. सन्मानः | ५५. सम्मानः/संमानः |

सम् + मानः = **सम्मानः** । सम् इति उपसर्गः अत्र । यदि च सतः = सत्पुरुषरस्य मानः इति अर्थः उच्यते, तर्हि 'सन्मानः' इति रूपं तु स्यात् । किन्तु, 'अमुकस्य सन्मानः प्रचलति' इत्यादयः वाक्प्रयोगाः दुष्यन्ति । अतः, सम् + मानः = सम्मानः/संमानः इति प्रयोगः एव वरम् ।

| | |
|---|---|
| ५६. मध्यन्तरम् | ५६. मध्यान्तरम् |

मध्य + अन्तरम् अनयोः योगे सवर्णदीर्घे **मध्यान्तरम्** इति स्यात् । पररूपसन्धेः नात्र अवकाशः, शकन्ध्वादिगणे तस्य अपाठात् । प्रादेशिकभाषासु मध्यन्तरम् इति प्रयुज्येत । तावता, संस्कृतभाषायां तत् शुद्धं भवितुं नार्हति । प्रकृतिप्रत्ययविवेकः, सन्ध्यादिप्रक्रिया च संस्कृतभाषायां द्रष्टव्यः एव ।

# रूपदोषाः

**अशुद्धम्** | **शुद्धम्**

५७. उच्छाटनम् | ५७. उच्चाटनम्

उदुपसर्गपूर्वकस्य भेदनार्थकस्य ण्यन्तस्य चटधातोः ल्युटि ’**उच्चाटनम्**’ इति रूपम् । ’चट’धातुः चवर्गप्रथमादिः, न तु चवर्गद्वितीयादिः । तस्मात्, ’उच्छाटनम्’ इति अशुद्धम् ।

५८. उच्चिष्टम् | ५८. उच्छिष्टम्

उदुपसर्गपूर्वकस्य असर्वोपयोगार्थकस्य ’शिष’धातोः क्तप्रत्यये **उच्छिष्टम्** इति रूपम् । उत् + शिष्टम् इति स्थिते श्चुत्वेन तकारस्य चकारः । ततः, “शश्छोटि” (पा.सू. ८.४.६३) इति सूत्रेण शकारस्य छकारः । तस्मात्, उच्छिष्टम् इति रूपम् । शकारस्य चकारः यः भवति सः चवर्गद्वितीयः, न तु चवर्गपञ्चमः । अतः, ’उच्छिष्टम्’ इत्येव शुद्धम् ।

# रूपदोषाः

**अशुद्धम्** | **शुद्धम्**

५९. कलियुगः | ५९. कलियुगम्

कृतद्वापरादिबोधकः युगशब्दः नपुंसके एव, न तु पुंसि । हलाद्यर्थे सः पुंसि । कोषो यथा – 'यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु' (अमरः) । प्रयोगो यथा – ' ...घोरं **कलियुगं**स्मृतम्' (ब्राह्म.पु.)।

६०. दोषाणि | ६०. दोषाः

दोषशब्दः पुंसि एव । नपुंसकप्रयोगः तु भ्रान्त्या ।

प्रयोगः यथा –

- नाल्पीयान् बहु सुकृतं हिनस्ति **दोषः** । ( किरा.. ७.१५)
- रसापकर्षकाः **दोषाः** ...... (साहित्यदर्पणः ७.१०)
- वातः पित्तः कफश्चेति त्रयो **दोषास्**समागताः (भाव.प्र.)

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ६१. तालुः | ६१. तालु |

**तालु**शब्दः न हि पुंसि, न तु नपुंसके । नपुंसके “स्वमोर्नपुंसकात्” (पा.सू. ७.१.२३) इति सूत्रेण सुलोपः । अतः, न विसर्गश्रवणम् । कोषप्रामाण्यं यथा – ’तालु च काकुदम्’ (अमरः) । प्रयोगो यथा – ’मुखस्तालु निर्भिन्नम्…’ (भाग. १०.१८) ।

| | |
| --- | --- |
| ६२. साम्राट् | ६२. सम्राट् |

जकारान्तस्य ’सम्राज्’शब्दस्य प्रथमैकवचनान्तं रूपं ’**सम्राट्**’ इति । तत्र सकारोत्तरम् आकारो नास्ति, अपि तु अकारः एव । सम्यक् राजते (राजृ - दीप्तौ) ’क्विप्’ । कोषो यथा – ’……शास्ति यश्चाज्ञया राज्ञः स सम्राट्’ (अमरः) । प्रयोगो यथा – ’….सम्राट् समाराधनतत्परोऽभूत्’ (रघु २.५) ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ६३. फलितकेशाः | ६३. पलितकेशाः |

वार्धकेन येषां केशाः श्वेताः भवन्ति, ते उच्यन्ते '**पलितकेशाः**' इति । 'पलितः' इत्यत्र पकारः अल्पप्राणः, न तु महाप्राणः । महाप्राणेन फकारेण युक्तस्य 'फलित'शब्दस्य फलयुक्तादयः अर्थाः । ते च अर्थाः नात्र विवक्षिताः । 'पित्तं च केशं पचति पलितं तेन जायते' इति वदति आयुर्वेदः । अमरकोशः वदति – 'पलितं जरसा शौक्ल्यं केशादौ' इति ।

| अशुद्धम् | शुद्धम् |
|---|---|
| ६४. पारितोषकम् | ६४. पारितोषिकम् |

सन्तोषेण तोषणाय वा यत् दीयते, तत् **पारितोषिकम्**। तत्र षकारोत्तरम् इकारः श्रूयते । इकाररहितं रूपम् असाधु । परितोषः प्रयोजनम् अस्य इति ठञ् – "प्रयोजनम्" (पा.सू. ५.१.१०९) इति सूत्रेण । ठस्य इकादेशः – "ठस्येकः" (पा.सू. ७.३.५०) इति सूत्रेण । तस्मात् प्रत्ययाङ्गभूतः इकारः श्रूयते एव । अतः, पारितोषिकम् इत्येव शुद्धम् ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|

६५. पित्थम् — ६५. पित्तम्

त्रिदोषेषु अन्यतमम् अस्ति '**पित्तम्**' । तत्र तकारद्वयं श्रूयते । उभयोः अपि तकारयोः अल्पप्राणता एव । एकस्य महाप्राणता इति तु भ्रान्तिः । अपिदीयते प्रकृतावस्था रक्ष्यते – अपि + देङ् (पालने) क्तः । विकृतावस्थया नाश्यते शरीरम् – अपि + दो (अवखण्डने) 'तः' इति अपरा व्युत्पत्तिः । उभयत्रापि अपेरल्लोपः ।

६६. जञ्झावातः — ६६. झञ्झावातः

**झञ्झावातः** इत्यत्र उभयत्रापि झकारः । तन्नाम उभौ अपि महाप्राणौ । कोषेषु दर्शनात् । जकारादिः (अल्पप्राणोपेतः) न दृश्यते सः ।

६७. जर्झरितः — ६७. झर्झरितः /जर्जरितः

'**जर्जरितः**' इति अल्पप्राणजकारद्वयोपेतं, '**झर्झरितः**' इति महाप्राणझकारद्वयोपेतं वा रूपं साधु । 'जर्ज' इति धातुः अस्ति । 'झर्झ' इत्यपि धातुः अस्ति । किन्तु, एकस्य अल्पप्राणता, अपरस्य महाप्राणता तु नास्ति ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ६८. शिरच्छेदः | ६८. शिरश्छेदः |

शिरस् + छेदः इति स्थिते श्चुत्वे '**शिरश्छेदः**' इति रूपं सिद्धम् । 'शिरस्'शब्दः न अकारान्तः, अपि तु सकारान्तः । तस्मात् शकारस्य श्रवणं स्यादेव । शकारलोपस्तु केनापि सूत्रेण न विहितः।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ६९. मार्ताण्डः | ६९. मार्तण्डः |

'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन पररूपम् । तस्मात्, '**मार्तण्डः**' इति रूपम् । (तन्नाम, तकारोत्तरम् अकारः) "परमार्ताण्डमास्यत्, पुनर्मार्ताण्डमास्यत्" इत्यादिषु दीर्घश्छान्दसः इति भावः । केचिदत्र सवर्णदीर्घवाहुः । पूर्वोक्तवैदिकप्रयोगस्तेषामनुकूलाः' - तत्त्वबोधिनी ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ७०. अक्षोहिणी सेना | ७०. अक्षौहिणी सेना |

अक्षाणाम् ऊहिनी = **अक्षौहिणी** । 'अक्षादूहिन्यामुपसङ्ख्यानम्' इति वार्तिकेन वृद्धिः । 'अक्षाणाम् इत्यस्य ऊहशब्देन समासे ततः इनौ तु अक्षोहिणीत्येव भवति' इति वदति तत्त्वबोधिनीकारः । प्रामाणिकप्रयोगे सत्येव अक्षोहिणी इत्यस्यापि साधुत्वं वक्तव्यं भवेत् । लोके दैनन्दिनव्यवहारे तु 'अक्षौहिणी' इत्यस्यैव प्रयोगः वरम् ।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ७१. जोतिषिकः | ७१. ज्यौतिषिकः/ज्योतिषिकः |

ज्योतिः नाम सूर्यादिग्रहाः । ते यत्र प्रतिपाद्यतया भवन्ति, तत् शास्त्रं 'ज्योतिषम्' उच्यते । तत् यः अधीते वेत्ति वा सः '**ज्यौतिषिकः**' (ज्योतिष + ठक्) । 'संज्ञापूर्वकः विधिः अनित्यः' इति मतम् आश्रित्य वृद्धिं विकल्पेन इच्छन्ति केचन । तदा तु '**ज्योतिषिकः**' इति । जकारोत्तरं यकारः तु स्यादेव सर्वत्र ।

# रूपदोषाः

**अशुद्धम्** | **शुद्धम्**

७२. वय्याकरणः/वैय्याकरणः — ७२. वैयाकरणः

व्याकरणं यः वेत्ति अधीते वा सः **वैयाकरणः** । (व्याकरण + अण्) ऐकाररहितं यकारद्वयोपेतं वा रूपम् असाधु एव ।

७३. जनार्धनः — ७३. जनार्दनः

जनैः अर्द्यते याच्यते इति **जनार्दनः** । अन्याः अपि व्युत्पत्तयः सन्ति एतस्य पदस्य । सर्वत्रापि धातुः तु 'अर्द' (गतौ याचने च) इति, यश्च अल्पप्राण'द'कारोपेतः, न तु 'ध'कारोपेतः । अतः, महाप्राणोच्चारणं दोषाय एव।

७४. पौर्णिमा — ७४. पूर्णिमा

यस्यां तिथौ चन्द्रमण्डलं पञ्चदशभिः अपि कलाभिः पूर्णं भवति, सा तिथिः उच्यते – '**पूर्णिमा**' इति । (पूर्णं चन्द्रस्य पूरणं, तेन निर्वृत्ता - इमप्) अत्र वृद्धेः प्रसक्तिः नास्ति । एतस्मिन् एव अर्थे 'पौर्णमासी' 'पौर्णमी' इत्येतौ शब्दौ अपि स्तः ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ७५. सिन्धूरम् | ७५. सिन्दूरम् |

स्यन्दू (प्रस्रवणे) इत्यस्य धातोः ऊरन्-प्रत्यये सम्प्रसारणे च ’**सिन्दूर**’शब्दस्य सिद्धिः । अत्र दकारः अल्पप्राणः, न तु महाप्राणः । तथा हि कोषः – ’सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके’ इति ।

| | |
| --- | --- |
| ७६. अम्बरीशः | ७६. अम्बरीषः |

न ह्यत्र ’ईश’शब्दः । अतः, तालव्यस्य न प्रसक्तिः । अबि (शब्दे) धातोः ’ईषन्’प्रत्ययः अरुडागमश्च निपातनात् (उ.४.२९)। अतः, ’**अम्बरीषः**’ इति रूपम् । अत्र मूर्धन्यः (षः) एव लेखनीयः ।

| | |
| --- | --- |
| ७७. विश्वस्थमण्डली | ७७. विश्वस्तमण्डली |

’Trust’ इत्येतम् अर्थम् अवगमयितुं दाक्षिणात्यैः एतस्य शब्दस्य प्रयोगः क्रियते । विश्वे यः भवति सः भवति ’विश्वस्थः’ । सः अत्र न अभिप्रेतः । विश्वासार्हः अत्र अभिप्रेतः । ’विश्वसिति’ इत्यस्य क्तान्तं रूपं प्रयोक्तव्यम् । तत् भवति – ’विश्वस्तः’ इति । अत्र तकारः अल्पप्राणः (त), न तु महाप्राणः (थ)। तस्मात्, महाप्राणोपेतं ’विश्वस्थः’ इति रूपम् अत्र न युज्यते ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ७८. बब्रुवाहनः | ७८. बभ्रुवाहनः |

बभ्रुः नाम अग्निः । विष्णुः, शिवः, पिङ्गलवर्णोपेतः इत्यादयः अपि तस्य अर्थाः । बिभर्ति इति बभ्रुः । [डु भृञ् (धारणपोषणयोः) + कुः] ऋकारेण सह स्थितः 'भ'कारः महाप्राणः । अल्पप्राणोपेतः असाधुः । अतः, '**बभ्रुवाहनः**' इत्यत्रापि रेफेण सह स्थितः (भ्र) महाप्राणः एव स्यात् ।

| अशुद्धम् | शुद्धम् |
|---|---|
| ७९. दूर्वासः/दूर्वासाः | ७९. दुर्वासाः |

'दुर्वासाः' इत्यत्र 'दुर्' इति प्रादिः । 'वासस्' इत्येषः सकारान्तः शब्दः । 'दुर्निन्दितं वासः वस्त्रं यस्य सः' इति, 'दुर्दुष्टं निगूढं वासः इव धर्मावरणं यस्य सः' इति वा व्युत्पत्तिः '**दुर्वासाः**' इत्यस्य । दकारोत्तरस्य उकारस्य न दीर्घः । अतः, 'दूर्वासाः' इति रूपम् असाधु । स च शब्दः सकारान्तः, न तु अकारान्तः । अतः, 'दुर्वासः' इति रूपम् अपि असाधु ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ८०. प्रसाधनम् | ८०. प्रसादनम् |

**प्रसादनं** नाम अलङ्करणं स्वच्छकरणं सन्तोषणं वा । तत्र धातुः विशरणाद्यर्थकः 'षद्लृ' । अतः, दकारः तत्र अल्पप्राणः एव । उपकरणाद्यर्थके 'साधन'शब्दे तु 'ध'कारः (महाप्राणः) । तत्र संसिद्ध्यर्थकः 'साध'धातुः ।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ८१. पृष्टम् | ८१. पृष्ठम् |

पत्रस्य (कागदस्य भागः) (पुरोभागः पृष्ठभागः वा) शरीरस्य वा पश्चार्धः वा अत्र अभिप्रेतः । तत्र च 'पृष'धातोः (सेचनार्थकस्य) यक् निपातनात् । अतः, महाप्राणः (ठकारः) एव प्रयोक्तव्यः । अल्पप्राणे प्रयुक्ते तु क्तप्रत्ययान्तता सिद्ध्येत् (पृषधातोः प्रच्छधातोः वा) । स च अत्र न अभिप्रेतः । कागदस्य पश्चार्धार्थे 'पुट'शब्दोऽपि प्रयोक्तुं शक्यः ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|

८२. कुष्टः — ८२. कुष्ठः

कुष्ठं नाम रोगविशेषः । स च शब्दः महाप्राणोपेतः (ठकारोपेतः) । कृष्णाति अङ्गम् – कृष (निष्कर्षे) + क्थन् । अल्पप्राणयुक्तः (टकारयुक्तः) शब्दः असाधुः ।

८३. वैढूर्यम् — ८३. वैडूर्यम्

महाप्राणोपेतं रूपम् असाधु । मणिविशेषः वैडूर्यपदेन निर्दिश्यते ।

८४. विषकलितः — ८४. विशकलितः

सम्यक् विमृष्टः इत्यर्थे प्रयुज्यते एषः शब्दः । माघस्य प्रयोगो यथा – 'इति विशकलितार्थामौद्धवीं वाचमेनाम् (२.११९) । शकारः अत्र तालव्यः । मूर्धन्ये (षकारे) प्रयुक्ते तु 'विषयुक्तः' इत्यस्य अर्थस्य सिद्धिः । स च अत्र न अभिप्रेतः।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
|---|---|
| ८५. याञ्चा | ८५. याच्ञा |

’याञ्चा’ इति प्रयोगः असाधुः । याचनार्थकता अत्र । याचृधातोः ’नङ्’प्रत्ययः । प्रत्ययः पर एव । यदि प्रत्ययः मित् अभविष्यत् तर्हि याञ्चा इति रूपं सिद्धं स्यात् । तथा तु नास्ति । अतः, **’याच्ञा’** इत्येव प्रयोक्तव्यम् । (चकारः आदौ, ञकारः अनन्तरम् इत्यर्थः )।

| अशुद्धम् | शुद्धम् |
|---|---|
| ८६. विष्टा | ८६. विष्ठा |

मलार्थकः अस्ति **’विष्ठा’**शब्दः । तथा हि अमरः – ’गूथं पुरीषं वर्चस्कम् अस्त्री विष्ठाविषौ स्त्रियौ’ इति । वितिष्ठते उदरे इति विष्ठा । वि + ष्ठा (गतिनिवृत्तौ) + कः । अतः षकारोत्तरं महाप्राणः (ठकारः) प्रयोक्तव्यः, न तु टकारः (अल्पप्राणः) ।

| अशुद्धम् | शुद्धम् |
|---|---|
| ८७. लोष्ठम् | ८७. लोष्टम् |

अत्र षकारोत्तरः टवर्गप्रथमः (टकारः), न तु टवर्गद्वितीयः (ठकारः) । सङ्घातार्थकः ’लोष्ट’धातुः अत्र । अतः, महाप्राणयुक्तः प्रयोगः दोषाय एव । कोषो यथा – ’लोष्टानि लेष्टव्यः पुंसि’ (अमरः) ।

# रूपदोषाः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ८८. मण्डोदरी | ८८. मन्दोदरी |

मन्दम् उदरं यस्याः सा **मन्दोदरी** । मयसुता रावणमहिषी सा । डकारश्रवणं नास्ति । (प्रादेशिकभाषायां श्रूयते ) नात्र मण्डशब्दस्य सम्बन्धः कोऽपि।

| अशुद्धम् | शुद्धम् |
| --- | --- |
| ८९. कोष्टकम् | ८९. कोष्ठकम् |

कृष (निष्कर्षे) धातोः उणादौ थन्-प्रत्यये 'कोष्ठः' इति रूपम् । प्रकोष्ठधान्यागारादयः अर्थाः तस्य । अल्पः कोष्ठः **कोष्ठकम्** । प्रत्ययः थन् । तस्य ष्टुत्वात् ठकारः । अल्पप्राणोपेतं (टकारोपेतं) रूपं नास्ति ।

एतादृशाः प्रयोगाः प्रायः अनन्ताः । शृङ्ग्राहिकया कानिचन उदाहरणानि अत्र दर्शितानि । एतादृशानां दोषाणां निवारणाय एकः एव परिहारः - अवधानदानम् एव । बोधनीयं, विस्तरेण वक्तव्यं वा न किञ्चिदस्ति । 'अवधानं दीयताम्' इति एतावदेव वदामः ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.